उत्सिक्तः, त्रि, (उत् + सिच् + क्तः) उद्धतः । इति त्रिकाण्डशेषः ॥ गर्व्वितः । वर्द्धितः । उद्रिक्तः । इति श्रीभागवतम् ॥ (यथा, मनुः ८ । ७१ ।
"बालवृद्धातुराणाञ्च साक्ष्येषु वदतां मृषा ।
जानीयादस्थिरां वाचमुत्सिक्तमनसां तथा" ।
"वीर्य्योत्सिक्तौ हि तौ पापौ कालपाशवशङ्गतौ" ।
इति रामायणे १म काण्डे ॥)

उत्सिच्यमानः, त्रि, (उत् + सिच् + शानच् ।) उद्रिच्यमानः । वृद्धिमान् । इति श्रीभागवतम् ॥

उत्सुकः, त्रि, (उत् उद्योगं सुवति सौति सुनोति वा । सु प्रसवैश्वर्य्ययोः । विचिसंज्ञापूर्व्वकत्वात् गुणाभावः । क्विपि आगमशास्त्रस्यानित्यत्वात्तुगभावो वा । ततः संज्ञायां कन् ॥ यद्वा उत् सुवति । षू प्रेरणे । मितद्र्वादित्वात् डुः । सत् क्षिति क्विप् वा । कनिकेण इति ह्रस्वः ॥ उत् + सु + क्विप् + कन् ।) वाञ्छितकर्म्मोद्यतः । तत्पर्य्यायः । इष्टार्थोद्युक्तः २ । इत्यमरः ॥ उत्कण्ठितः । इति हेमचन्द्रः ॥ (यथा, रामायणे आदिकाण्डे ।
("प्रेषयिष्यति राजा तु कुशलार्थं तवानघ ।
ब्राह्मणान् नित्यशः पुत्त्र मोत्सुका भूः कदाचन" ॥
"वत्सोत्सुकापि स्तिमिता सपर्य्याम्" ।
इति रघुवंशे २।२२ ॥)

उत्सूरः, पुं, (सूरं सूर्य्यमतिक्रान्तः ।) दिनावसानम् । इति हेमचन्द्रः ॥

उत्सृष्टः, त्रि, (उत् + सृज् + क्त ।) कृतोत्सर्गः ।तत्पर्य्यायः । त्यक्तः २ हीनः ३ विधुतः ४ समुज्झितः ५ धूतः ६ । इत्यमरः ॥ (यथा, याज्ञवल्क्यः ।
"महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः" ॥)

उत्सेचनं, क्ली, (उत् + सिच् + ल्युट् ।) ऊर्द्धसेकः । उथलन उपचन इत्यादि भाषा ॥

उत्सेधः, पुं, (उत् + सिध् + घञ् ।) पर्व्वतवृक्षादीनां दैर्घ्यम् ।
("कूर्म्मस्त्रियोजनोत्सेधो दशयोजनमण्डलः" ॥
इति महाभारते गजकूर्म्मयुद्धे । २९ । ३१ ।)
उच्छ्रयः । (यथा, कुमारे ५ । ८ ॥
"पयोधरोत्सेधविशीर्णसंहति" ॥
उपरिभागः । यथा, कुमारे ५।२४ ।
"पयोधरोत्सेधनिपातचूर्णिताः" ।)
शरीरम् । इत्यमरः । संहननम् । इति हेमचन्द्रः ॥
("श्रोत्सेधमुग्रार्यशिरातनुत्वम्" ।
इति भावप्रकाशे शोथाधिकारे ॥
"उत्सेधं संहतं शोफं तमाडर्निचयादतः" ।
इति निदानस्थाने त्रयोदशाध्याये वाभटेनोक्तम् ॥)

उद् व्य, (उ + क्विप् + तुक् । पृषोदरादित्वात् साधुः ।) विंशत्युपसर्गान्तर्गत उपसर्गविशेषः । अस्यार्थः । ऊर्द्धम् । उत्कर्षः । प्राकट्यम् । नैकट्यम् । इति दुर्गादासः ॥ प्रकाशः । विभागः । प्राबल्यम् । अवस्थानम् । शक्तिः । प्राधान्यम् । बन्धनम् । भावः । मोक्षः । लाभः । ऊर्द्धकर्म्म । इति मेदिनी ॥

उदं, क्ली, (उद + अच् ।) जलम् । इति शब्दरत्नावली ।
("जगत्त्रयान्तोदधिसंप्लवोदे
नारायणस्योदरनाभिनालात्" ।
इति श्रीभागवते । तथा च गीतायाम् ।२।४६।
"यावानर्थ उदपाने सर्व्वतः संप्लुतोदके" ॥)

उदक्, [च्] व्य, (उद + अञ्च् + अस्तातिः ।) उत्तरदिग्देशकालाः । इति मेदिनी ॥

उदकं, क्ली, (उनत्तीति । उन्दी क्लेदने + क्वुन् । उदकमिति २।३९ । उणादिसूत्रेण साधु ।) जलम् । इत्यमरः ॥
("अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठति" ।
इति माघः २।३४॥ तथा श्रीभगवद्गीता । २।४६॥
"यावानर्थ उदपाने सर्व्वतः संप्लुतोदके" ।
"उदकस्योदः एकहलादौ । पाणिनिः।६।३।५९ । इति विकल्पः । उदकुम्भः । उदककुम्भः । यथा, भट्टिः । २ । २० । "तमःक्षणः शान्त्युदकुम्भहस्ताः" ॥ उदशब्दोऽप्युदकपर्य्याय इति भाष्यटीका । उदकस्योदः संज्ञायामिति रक्षितः। यथा, कुमारे ५।२६ । "सहस्यरात्रीरुदवाससतत्परा" ॥ इति उज्ज्वलदत्तः ।
वारिशब्देऽस्य विवरणं बोद्धव्यम् ॥)

उदकपरीक्षा, स्त्री, (उदकस्य उदकेन वा परीक्षा ।) दिव्यविशेषः । यथा । अथोदकपरीक्षा ।

पितामहः ।

"तोयस्याथ प्रवक्ष्यामि विधिं धर्म्म्यं सनातनम् ।
मण्डलं पुष्पधूपाभ्यां कारयेत् सुविचक्षणः ॥
शरान् संपूजयेद्भक्त्या वैणवञ्च धनुस्तथा" ।
तत्र प्रथमतो वरुणं पूजयेत् । यथा नारदः ।
"गन्धमाल्यैः सुरभिभिर्मधुक्षीरघृतादिभिः ।
वरुणाय प्रकुर्व्वीत पूजामादौ समाहितः" ॥
ततो धर्म्मावाहनादिसकलदेवतापूजाहोमसमस्तकप्रतिज्ञापत्रशिरोनिवेशान्तं कर्म्म कुर्यात् ।

कात्यायनः ।

"शरांस्त्वनायसाग्रांस्तु प्रकुर्व्वीत विशुद्धये ।
वेणुकाण्डमयांश्चैव क्षेप्ता च सुदृढं क्षिपेत्" ॥

पितामहः ।

"क्षेप्ता च क्षत्त्रियः कार्य्यस्तद्वृत्तिर्ब्राह्मणोऽथवा ॥
अक्रूरहृदयः शान्तः सोपवासस्तथा शुचिः ॥
इषून् प्रक्षिपेद्धीमान् मारुते वाति वा भृशम् ।
विषमे भूप्रदेशे च वृक्षस्थाणुसमाकुले" ॥*॥

नारदः ।

"क्रूरं धनुः सप्तशतं मध्यमं षट्शतं मतम् ।
मन्दं पञ्चशतं प्रोक्तमेष ज्ञेयो धनुर्विधिः" ॥
अङ्गुलीनां सप्ताधिकं शतं यस्य धनुषः परिमाणं तत् सप्तशतम् । एवं षट्शतादिकम् ॥ * ॥

पितामहः ।

"मध्यमेन तु चापेन प्रक्षिपेत्तु शरत्रयम् ।
हस्तानान्तु शते सार्द्धे लक्ष्यं कृत्वा विचक्षणः ॥
तेषाञ्च प्रेषितानान्तु शराणां शास्त्रदर्शनात् ।
मध्यमस्तु शरो ग्राह्यः पुरुषेण बलीयसा ॥
शराणां पतनं ग्राह्यं सर्पणं परिवर्ज्जयेत् ।
सर्पन् सर्पन् शरो याति दूराद्दूरतरं यतः" ॥
पतनं ग्राह्यमिति शरपतनस्थानपर्य्यन्तं गच्छेदित्यर्थः । तेन प्रसरणपक्षेऽपि पतनस्थानकाण्डग्रहणं ततश्च प्रथमतः पुरुषान्तरेण तत्स्थाने शरः आनेतव्यः ॥ * ॥

नारदः ।

"नदीषु नातिवेगासु तडागेषु सरःसु च ।
ह्रदेषु स्थिरतोयेषु कुर्य्यात् पुंसां निमज्जनम्" ॥
नातिवेगासु स्थितिविरोधिवेगशून्यासु ॥ * ॥ विष्णुः । पङ्कशैवालदुष्टग्राहमत्स्यजलौकादिवर्ज्जिते तस्य नाभिमात्रजले मग्नस्यारागद्वेषिणः पुरुषस्यान्यस्योरू गृहीत्वा अभिमन्त्रिताम्भः प्रविशेत् । तत्समकालञ्च नातिक्रूरमृदुना धनुषा पुरुषोऽपरः शरमोक्षं कुर्य्यादिति तस्य शोध्यस्येत्यर्थः । अन्यथा तस्येति व्यर्थ स्यात् ॥ * ॥

अन्यपुरुषस्य स्तम्भधारणमाह स्मृतिः ।

"उदके प्राङ्मुखस्तिष्ठेडर्म्मस्थूणां प्रगृह्य च" ॥*॥
प्राड्विवाककर्त्तृकजलाभिमन्त्रणमाह पितामहः ।
तोय त्वं प्राणिनां प्राणः सृष्टेराद्यन्तु निर्म्मितम् ।
शुद्धेश्च कारणं प्रोक्तं द्रव्याणां देहिनां तथा ॥
अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे" ॥ * ॥
शोध्यकर्त्तृकाभिमन्त्रणमाह याज्ञवल्क्यः ।
"सत्येन माभिरक्षस्व वरुणेत्यभिशाप्य कम् ।
नाभिमात्रोदकस्थस्य गृहीत्वोरू जलं विशेत्" ॥
मा मां । अभिशाप्य शपथं कारयित्वा । कं जलम् । विशेत् निमज्जेत् ॥ * ॥ तोरणञ्च निमज्जनसमीपे समे स्थाने शोध्यकर्णप्रमाणोच्छ्रितं कार्य्यम् । यथा नारदः ।
"गत्वा तु तज्जलस्थानं तटे तोरणमुच्छ्रितम् ।
कुर्व्वीत कर्णमात्रन्तु भूमिभागे समे शुचौ" ॥ * ॥
शरमोक्षे विशेषमाहतुर्नारदबृहस्पती ।
"शरप्रक्षेपणस्थानाद्युवा जवसमन्वितः ।
गच्छेत् परमया शक्त्या यत्रासौ मध्यमः शरः ॥
मध्यमं शरमादाय पुरुषोऽन्यस्तथाविधः ।
प्रत्यागच्छेत्तु वेगेन यतः स पुरुषो गतः ॥
आगतस्तु शरग्राही न पश्यति यदा जले ।
अन्तर्ज्जलगतं सम्यक् तदा शुद्धिं विनिर्द्दिशेत् ॥
अन्यथा न विशुद्धः स्यादेकाङ्गस्यापि दर्शनात् ।
स्थानाद्वान्यत्र गमनाद्यस्मिन् पूर्ब्बं निवेशयेत्" ॥*॥
जविनौ विशेषयति नारदः ।
"पञ्चाशतो धावकानां यौ स्यातामधिकौ जवे ।
तौ च तत्र नियोक्तव्यौ शरानयनकर्म्मणि" ॥
एकाङ्गस्य दर्शनादिति कर्णाद्यभिप्रायेण ।
"शिरोमात्रन्तु दृश्येत न कर्णौ नापि नासिके ।
अप्सु प्रवेशने यस्य शुद्धं तमपि निर्द्दिशेत्" ॥
इति विशेषाभिधानात् । कात्यायनः ।
"निमज्ज्योत्प्लवते यस्तु दृष्टश्चेत् प्राणिना नरः ।
पुनस्तत्र निमज्जेत दंशचिह्नविभावितः" ॥
जलान्तर्गतमत्स्यजलौकादिना दष्टः समुत्प्लवते यदि तदा दष्टे दृष्टे पुनर्निमज्जनीय इत्यर्थः ॥ * ॥

पितामहः ।

"गन्तुश्चापि च कर्त्तुश्च समं गमनमज्जनम् ।
गच्छेत् तोरणमूलात्तु शरस्थानं जवी नरः ॥
तस्मिन् गते द्वितीयोऽपि वेगादादाय शायकम् ।
गच्छेत्तोरणमूलन्तु यतः स पुरुषो गतः ॥
आगतस्तु शरग्राही न पश्यति यदा जले ।